श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवादिराजयति कृतम्

# ॥ श्री हयवदनाष्टकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ श्री हयवदनाष्टकम् ॥

दासस्य मे शिरसि हस्तसहस्रपत्रं
श्रीशार्पयाशु वरदेश्वर वाजिवक्त्र।
व्यासादिमूर्तिशतशोभित मे प्रसीद
पाशं विखण्डय भवाभिधमम्बुजाक्ष॥ १ ॥

दासस्य मे शिरसि पादलसत्सरोजं
श्रीशार्पयाशु निजभूषणभूषणं ते।
आशां विनाशय भवत्स्मरणप्रतीपान्
दोषांश्च दूरय भवाव्यय मेऽन्तरङ्गे॥ २ ॥

संसारदावशिखया परितप्यमानः
संसेवकस्तव तुरङ्गमतुङ्गवक्त्र।
संशुद्धमध्वहृदयाम्बुजराजहंस
कं साधयामि शरणं वरदं विना त्वम्॥ ३ ॥

पञ्चात्मक श्रुतिनिगूहकदानवेन्द्र
पञ्चत्वदायक रमाञ्चितपादपद्म।
सिञ्च त्वदङ्गपरिपावितपापभेद
चुञ्च्वङ्घ्रिपद्मपरिलम्बिसुधाप्रवाहैः ॥ ४ ॥

सोऽहं वृणोमि तव पाददिनेशसेवां
मोहान्धकारनिकरक्षयदां विनाऽन्यत्।
व्यूहं सतां समवलम्ब्य भवच्चरित्र
व्याहारतृप्तकरणं कुरु किं बहूक्त्या॥ ५ ॥

किं बन्धनैः कथय बन्धुजनैर्मुरारे
किं भारभूतकटकादिविभूषणैर्वा।
अम्भस्सुमग्नकरणस्य भवाम्बुराशेः
किं भङ्गशीलधनभूभवनाद्युपायैः ॥ ६ ॥

www.prapatti.com

उत्फुल्लपद्मदळनेत्र तुरङ्गवक्त्र
    रत्नौघचित्रतिलकारुणमञ्जुलोष्ठ।
विस्तीर्णवक्षसि विराजितभूरिहार
    वृत्तातिदीर्घकरकञ्ज कृताखिलार्थ॥ ७ ॥

लक्ष्मीनिवास तनुकोमलमञ्जुमध्य
    लक्ष्यत्रिवल्युदरनाभिलसत्सरोज।
रत्नाग्र्यमेखलरणच्चरणाब्जभूष
    भृत्यं विलोकय दयार्द्रदृशाऽन्वहं माम्॥ ८ ॥

इत्यष्टकेन हयकन्धरमिन्दिरेशं
    रक्तात्मपादतलरञ्जितदिक्प्रदेशम्।
तत्पादपद्मकृतमानसवादिराज
    प्रोक्तेन योऽर्चयति तस्य भवेत् प्रियोऽसौ॥ ९ ॥

॥ इति श्री हयवदनाष्टकं सम्पूर्णम् ॥

www.prapatti.com